
# ಶ್ರೀಮದಾನನ್ದತೀರ್ಥಭಗವತ್ಪಾದಾಚಾರ್ಯಃ



Tracking:

| Sr | Date | Remarks | By |
|---|---|---|---|
| 1 | 27/07/2013 | Typing Started on | H K Srinivasa Rao |
| 2 | 27/07/2013 | Typing Ended on | H K Srinivasa Rao |
| 3 | 27/07/2012 | I Proof Reading | H K SrinivasaRao &<br>Narahari Rattihalli<br>B S Pavanshreesha |
| 3 | 27/07/2013 | Published | H K Srinivasa Rao |

## ॥ ಶ್ರೀ ಹಯವದನ ರಂಗವಿಠ್ಠಲ ಗೋಪೀನಾಥೋ ವಿಜಯತೇ॥

*Blessed by Lord and with His divine grace, we are pleased to publish this Magnanimous Work of Sri Acharya Madhwa. It is a humble effort to make available this Great work to Sadhakas who are interested in the noble path of propagating Acharya Madhwa's Philosophy.*

*With great humility, we solicit the readers to bring to our notice any inadvertant typographical mistakes that could have crept in, despite great care. We would be pleased to incorporate such corrections in the next versions. Users can contact us, for editable version, to facilitate any value additions.*

*Contact: H K SRINIVASA RAO, N0 26, 2ND FLOOR, 15TH CROSS, NEAR VIDHYAPEETA CIRCLE, ASHOKANAGAR, BANGALORE 560050. PH NO. 26615951, 9901971176, 8095551774, Skype Id: SRKARC6070*

*Email :* **srkarc@gmail.com**

## ಕೃತಜ್ಞತೆಗಳು



ಜನ್ಮಾಂತರದ ಸುಕೃತದ ಫಲವಾಗಿ ಮಧ್ವಮತದಲ್ಲಿ ಜನಿಸಲು, ಪ್ರೇಮಮೂರ್ತಿಗಳಾಗಿ ನನ್ನ ಅಸ್ತಿತ್ವಕ್ಕೆ ಕಾರಣರಾದ, ಈ ಸಾಧನೆಗೆ ಅವಕಾಶಮಾಡಿದ, ನನ್ನ ಪೂಜ್ಯ ಮಾತಾ ಪಿತೃಗಳಾದ, ದಿವಂಗತರಾದ ಲಲಿತಮ್ಮ ಮತ್ತು ಕೃಷ್ಣರಾವ್ ಹೆಚ್ ಆರ್ ಅವರ ಸವಿ ನೆನಪಿನಲ್ಲಿ ಈ "ಸರ್ವಮೂಲ ಯಜ್ಞ"

"ಮಾತೃದೇವೋ ಭವ-ಪಿತೃದೇವೋಭವ-ಆಚಾರ್ಯದೇವೋಭವ"

ಗ್ರಂಥ ಋಣ: ತಿರುಪತಿ ತಿರುಮಲ ದೇವಸ್ಥಾನದಿಂದ ಪ್ರಕಾಶಿತವಾದ ತತ್ತ್ವಸಂಖ್ಯಾನಮ್ -1980

# तत्त्वसङ्ख्यानम्

## ॥ तत्वसङ्ख्यान टीका ॥

लक्ष्मीपतेः पदाम्भोजयुगं नत्वा गुरोरपि।

करिष्ये तत्त्वसङ्ख्यानव्याख्यानं नातिविस्तरम् ॥

मुमुक्षुणा खलुपरमात्मा जगदुदयादिनिमित्तत्वेनावश्यमवगन्तव्य इति सकलसच्छास्त्राणामविप्रतिपन्नोऽर्थः। इदञ्चावान्तरानेकभेदभिन्नस्य जगतो विज्ञानमपेक्षत इति जगदपि तथाऽवगन्तव्यम्। तदिदं प्रधानाङ्गभूतं तत्वद्वयं शास्त्रे विक्षिप्य प्रतिपादितं शिष्यहिततया सङ्गृह्य प्रतिपादयितुं प्रकरणमिदमारभते भगवानाचार्यः॥

ननु प्रकारणादौ मङ्गलं किमपि कस्मान्नानुष्ठितम्, न तावत्तदफलमेव, प्रेक्षावद्भिरनुष्ठितत्वात्। नापि प्रारिप्सितपरिसमाप्त्यादिव्यतिरिक्तफलम्, नियमेन प्रारम्भे तदनुष्ठानात्; उच्यते - अनुष्ठितमेव भगवता मङ्गलम्। मानसादेरपि तस्य सम्भवात्।

तच्च परमास्तिकत्वादनुमीयते। यच्चायं स्वातन्त्र्यादविशिष्टस्य विष्णोरादित एव सङ्कीर्तनं करोति, किं ततोऽन्यन्मङ्गलं नाम। अन्यपरमपि तद्भक्त्यानुष्ठितं स्वभावात्सम्पादयत्येवाखिलमङ्गलानीति॥

तत्र तावत्तत्त्वं सामान्यतो विभागेनोद्दिशति - स्वातन्त्र्यमिति॥

**स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते**

**स्वतन्त्रो भगवान् विष्णुर्भावाभावौ द्विधेतरत् ॥ 01 ॥**

तत्त्वमानारोपितम् प्रमितिविषय इति यावत्। तेन तस्य भावस्तत्वमित्यादिखण्डनानवकाशः। ननु शुक्तिरजतादिकं कथं न तत्त्वम्। न हि धर्मो वा रजतत्वं वा न प्रमेयम्। नापि तयोस्सम्बन्धः। शुक्तिव्यक्तौ रजतत्वस्य स नास्तीति चेत् मा भूत्। न हि गृहे देवदत्तो नास्तीत्येतावता न प्रमेय इति॥

स्यादिदमारोपितस्यान्यत्र सत्तामाभ्युपगच्छतां दूषणम्। अत्यन्तासदेव रजतं दोषवशाच्छुक्तिकायामारोप्यत इति वादे तु नायं दोषः। एतेन भाविपाकरागः कुम्भः श्यामतादशायां रक्तपित्तिना रक्ततयोपलम्बमानस्तत्वं स्यादित्यपि परास्तम्। भाविनः प्रमेयत्वेऽपि पूर्वस्य तथा (त्वाभावात्।) भावाभावात्। धर्मिणस्तथाबावाङ्गीकारादिति।

तद्विविधम्। स्वतन्त्रमस्वतन्त्रं चेतीति। इतिशब्दाध्याहारेण योज्यम्। अन्यथा स्वतन्त्रमस्वतनत्त्रं च तत्त्वं प्रत्येकं द्विविधमिति प्रतीतिस्स्यात्॥

स्वरूपप्रमितिप्रवृत्तिलक्षणसत्तात्रैविध्ये परानपेक्षं स्वतन्त्रम्। परोपेक्षमस्वतन्त्रम् । तदुपपादनायोक्तं 'इष्यत' इति । प्रामाणिकैरिति शेषः । तथाहि यदि तत्वमेव नास्तीति ब्रूयात् तदा प्रत्यक्षादिविरोधः। भ्रान्तिस्सेति चेन्न, बाधकाभावात् । न च निरधिष्ठाना भ्रान्तिरस्ति। नापि निरवधिको बाधः। नास्त्येव तत्वमित्यस्यार्थस्य प्रमितत्वाऽ-प्रमितत्वयोर्व्याघातश्च । यदि चैकमेव तत्त्वं, तदा भेदोपलम्भविरोधः। तद्भ्रान्तितायां च बाधकं वाच्यम्। तच्चान्यत्र निरस्तम् ॥ यदि वा सर्वमेव स्वतन्त्र स्यात्, तदा

पारतन्त्र्यादिप्रतीतिविरोधः। नित्यसुखादिप्रसङ्गश्च॥ यदि वा परतन्त्रमेव तत्त्वं भवेत्, तदाऽनवस्थितेरसम्भावाच्च न कस्यापि सत्तादिकं स्यात्। आगमविरोधश्च॥

यद्यपि भावाभावतया वा चेतनाचेतनत्वेन वा नित्यानित्यतया वाऽस्य द्वैविध्यं शक्यते वक्तुम्। तथाप्यस्य वैयर्थ्यात् अयमेव विभागो न्याय्यः। परतन्त्रप्रमेयं स्वतन्त्रप्रमेयायत्ततया विदितं हि निःश्रेयसाय भवति। तथा च प्रकरणान्ते वक्ष्यति। अन्यथा गङ्गावालुकापरिगणनवत् इदं तत्त्वसङ्ख्यानमपार्थकं स्यात्। अतः स्वतन्त्रास्वतन्त्रभेदात् द्विविधं तत्त्वमिति स्वतन्त्रतत्वस्य प्राधान्यात् तदेवादावुद्दिष्टम्; उद्देशेनैव लक्षणं लब्धमिति॥

अत (तत) एवादौ तन्निर्दिशति – स्वातन्त्र इति॥ 'स्वतन्त्रो भगवान् विष्णुः' अत्र भगवानिति विष्णोः स्वातन्त्र्योपपादकम्। अन्यदस्वतन्त्रमिति शेषः। अथवा द्वे तत्वे इत्युक्ते स्वतन्त्रमिव परतन्त्रमेका व्यक्तिरेव प्रसज्येत। तथाच प्रमाणाविरोधो वक्ष्यमाणविभागविरोधश्च। अतो द्विविधमित्युक्तम् । ततश्च स्वतन्त्रमप्यनेकं स्यादित्यत इदमुक्तम्। अथवा स्वतन्त्रास्वतन्त्रभेदेन तत्त्वद्वैविध्यमङ्गीकुर्वाणा अपि साङ्ख्यादयः प्रधानादिकं स्वतन्त्रतत्त्वमातिष्ठन्ते। तन्निरासायेदमुदितमिति॥

द्विविधामित्युक्तय परतन्त्रतत्वमवान्तरभेदवदिति सूचितम्, तत्कथम्? तत्राह - भावेति॥ ' भावाभावौ द्विधेतरत्'॥ इतरत्, स्वतन्त्रात्। अस्वतन्त्रतत्वं द्विधा । कथम् ? भावोऽभावश्चेति॥ अभावप्रतीतिर्भावप्रतीत्याधीना नियमेनेति प्राधान्यात् प्रथमं भावस्योद्देशः । प्रथमप्रतीतावस्तीत्युपलभ्यते यः, स भावः। यश्च प्रथमोपलब्धौ नास्तीति प्रतीयते सोऽभावाः। कुत एतत् ? स्वरूपेण हि भावाऽभावौ विधिनिषेधात्मानौ, रूपान्तरेणतु निषेधविधिरूपौ। तत्र आपातजायां संविदि स्वरूपमेव

भासते। द्वितीयादिप्रतीतौ रूपान्तरम्। कार्यगम्यत्वात् सामग्रीभेदस्य। तथाच प्रतीतिः – अस्त्यत्र घटः स न शुक्ल इति। एवं नास्त्यत्र घटः, अस्ति घटाभाव इति॥

ननु- स्वतन्त्रतत्त्वं भावोऽभावोऽन्यद्वा। नाद्यद्वितीयौ, भावाभावयोः परतन्त्रभेदत्वात्। न तृतीयः व्याघातात् । मैवम्। भावलक्षणाक्रान्तत्वात्। परतन्त्रं भावाऽभावतया द्विधैव, न पुनरेकविधम्, नापि त्रिविधमित्येवंपरो विभागः। न पुनः परतन्त्रमेव भावाऽभावात्मकमिति॥

यथा भावेषु स्वतन्त्रतत्त्वं प्रविशति, तथा विभागः क्रियतामिति चेत् – नैवं शङ्क्यम्, तद्धि प्रधानतया सर्वविविक्तमेव वेदितव्यम्। अन्यथा द्विविधं तत्त्वं, भावोऽभावश्च। भावोऽपि द्विविधः नित्योऽनित्यश्च। नित्योऽपि द्विविधः, चेतनोऽचेतनश्च। चेतनोऽपि द्विविधः, स्वतन्त्रोऽस्वतन्त्रश्च इति कर्तव्यम्। एवं सति न प्राधान्येन प्रतिपत्तिस्स्यात्। भगवद्व्यतिरिक्तस्य सर्वस्यापि अस्वातन्त्र्यप्रतीतिर्न स्यात्। अस्मिन् पक्षे स्वतन्त्रस्य भावत्वं न विदितं स्यादिति सममेवेति चेत्। न; पुरुषार्थोपयोगानुपयोगाभ्यां विशेषात्। अभावादीनां नित्यत्वाद्यनुक्तिश्च समैव । तस्मात् यथान्यासमेवास्तु॥

अथ – अस्वतन्त्रं चेतनत्वादिनैव विभाज्यताम्। किं चेतनत्वादिना विभज्य भावाऽभावतया विभागः कर्तव्यः उतायं न कर्तव्य एव । नाद्यः – (अविशेषात्) विशेषाभावात्। अभावस्याचेतनत्वं एवं सति नोक्तं स्यादिति चेत् – तथा सति चेतनस्य भावत्वमपि नोक्तं स्यादिति समम्। तर्हि केन विशेषणास्य प्राधान्यमिति चेत् – वादिविप्रतिपत्तिभावाभावाभ्यां विशेषात् । अत एव न द्वितीयोऽपीति॥ अभाव एव नास्तीति केचित् । तदसत्। नास्तीति प्रतीतेर्दुरपह्नवत्वात्। घटो नास्तीति प्रतीतिर्भूतलमात्रविषयेति चेत् – मात्रेति किं भूतलमेवोच्यते ? उतातिरिक्तं किञ्चित् ?

आद्ये घटवत्यपि प्रसङ्गः। अतिरिक्तोऽपि घटश्चेदुक्तो दोषः। भावान्तरं चेत् – रूपवति घटे गन्धो नास्तीति प्रतीतिप्रसङ्गः । ननु – घटाभावो घटाभाववति भूतले सम्बध्यते ? उत घटवति ? नाद्यः, आत्माश्रयादिदोषप्रसङ्गात्। न द्वितीयः, विरोधात्। अतो वक्तव्यं भूतलमात्र इति॥

तदेवास्तु नास्तीति प्रतीतिविषय इति चेन्न। प्रश्न एवायं विविच्यताम्। यद्यभावासम्बन्धात् प्राक् कीदृशं भूतलमिति। यदि वा सम्बन्धसमये कीदृशमिति। यद्वा यद्यभावात् इदं विविच्येत तदा कीदृशं नाम स्यादिति। आद्ये – स घट इत्येवोत्तरम्। द्वितीये - घटभाववदिति। तृतीये – यदि विवेको वस्तुकृतः तदा अभावस्य नष्टत्वात् घटवादिति। यदि बुद्धिकृतः तता बुद्ध्यैव घटप्रसक्तिमदिति। अन्यथा एवं भावप्रतिक्षेपोऽपि स्यादित्यास्तां विस्तरः॥

द्विधेत्युक्त्या भावाऽभावयोरवान्तरभेदोऽस्तीति सूचितम्। तत्र भावनिरूपणात् अभावनिरूपणस्याल्पत्वात् सूचिकटाहन्यायेन पश्चादुद्दिष्टमप्यभावं आदौ विभागेनोद्दिशति – प्रागिति ॥

**प्राक्प्रध्वंससदात्वेन त्रिविधोऽभाव इष्यते**

**चेतनाचेतनत्वेन भावोऽपि द्विविधो मतः ॥02 ॥**

प्राक्त्वेन प्रध्वंसत्वेन सदात्वेनोपलक्षितः अभावस्त्रिविध इष्यते प्रामाणिकैरिति शेषः॥ उत्तरैकावधिरभावः प्रागभावः। प्रतीयोग्युत्पत्तेः प्रागेवऽभावोऽस्ति, उत्पन्ने तु तस्मिन्नास्तीति कृत्वा। पूर्वैकावधिरभावः प्रध्वंसाभावः। प्रतियोगिप्रध्वंसाऽन्तरमेवाभावो न तु प्रागस्तीति। न चैवं प्रागभावप्रध्वंसः

प्रध्वंसप्रागभावः इति प्रवाहौ प्रसज्ज्येते। प्रतियोगिन एव प्रागभावप्रध्वंसत्वेन प्रध्वंसप्रागभावत्वेन चाङ्गीकृतत्वात्। तर्हि घटप्रध्वंसो नाम प्रागभावनिवृत्तेः। निवृत्तिरिति प्गागभावोन्मज्जनप्रसङ्ग इति चेत् - न; घटवत्तध्वंसस्यापि तद्विरोधित्वात्। निरवधिकोऽभावः सदाऽभावः। सदा अभावोऽस्तीति कृत्वा। अत्यन्ताभाव इति प्रसिद्धसंज्ञातिक्रमेण सदाऽभाव इति संज्ञान्तरकरणं किमर्थम्। लक्षणस्यापि उद्देशेनैव सूचनार्थम्। यच्चान्यैरत्यन्ताभावस्वरूपमुक्तं -संसर्गप्रतियोगिकाभावोऽत्यन्ताभाव इति। यथा एतद्घटैतद् भूतलसंसर्गाभावः इति, तदपि निराकर्तुमेतत्। तस्य निरवधिकत्वाभावात्। तर्ह्युदाहृतश्चतुर्थस्स्यादिति चेन्न। तस्यापि यथासम्भवं प्रागभावादिष्वन्तर्भावात्। एके ब्रुवते - संसर्गाभावोऽन्योन्याभावश्चेति द्विविध एवाभाव इति। अन्ये तु – प्राक् प्रध्वंसात्यन्तान्योन्याभावात्मा चतुर्विध इति; तदुभयं निराकर्तुं इष्यत इत्युक्तम्। अन्योन्याभावो हि भेद एव। स च स्वरूपमेवेत्यन्यत्रोपपादितम्। कार्यकारणयोस्संसर्गस्य अन्यत्र (निरस्तत्वेन)निराकृतत्वेन प्रागभावप्रध्वंसाभावयास्संसर्गाभावत्वानुपपत्तेश्चेति॥

भावं विभज्य दर्शयति - चेतनेति॥ 'चेतनाचेतनत्वेन भावोऽपि द्विविधो मतः॥ न केवलमभावो भेदवान्, किन्तु भावोऽपीत्यपिशब्दः। चेतयतीति चेतनः। अनेवंविधोऽचेतनः। तेन विष्णोश्चेतनत्वं अभावस्याचेतनत्वं च ज्ञातव्यम्। सर्वमचेतनं चेतनार्थमिति चेतनस्य प्राधान्यात्पूर्वमुद्देशः। मृदब्रवीवादित्यादिवचनात् सर्वं चेतनमेवेति मतनिरासाय 'मत' इत्युक्तम्। तच्चाभिमान्यधिकरणे निरस्तम्। चेतनादिविभागस्य नित्यादिविभागादभ्यर्हितत्वात् स एवादावुदाहृतः॥

यथोद्देशं चेतनविभागमाह - दुःखेति॥

दुःखस्पृष्टं तदस्पृष्टमिति द्वेधैव चेतनम् ।

नित्याऽदुःखा रमाऽन्ये तु स्पृष्टदुःखा समस्तशः ॥ 03 ॥

कदाचिद्दुःखसम्भद्धमेव दुःखस्पृष्टम्, कदापि दुःखासम्बद्ध तदस्पृष्टम्। कल्पितत्वाद् दुःखादीनां न किञ्चिद् दुःखस्पृष्टमित्येके। ईश्वरातिरिक्तं सर्वमपि दुःखस्पृष्टमेवेत्यन्ये। तदुभयनिरासाय एवकारः। आद्यस्य प्रत्यक्षविरुद्धत्वात्। द्वितीयस्य आगमविरुद्धत्वात्। परमेश्वरस्य दुःखास्पृष्टत्वं स्वातन्त्र्येणैव सिद्धम्। यद्यप्यनयोः दुःखास्पृष्टं चेतनं प्रधानम्, तथाप्याभावस्य भावनिरूप्यत्वात् दुःखस्पृष्टस्य प्रथममुद्देशः।

तथापि प्राधान्यक्रमस्य मुख्यत्वात् तदनुसारेण द्वे अपि निर्दिशति नित्येति॥ अन्ये = चेतनाः। एके तु व्यष्टिसमष्टिभेदेन जीवान् परिकल्प्य गरुडानन्तविष्वक्सेनादीन् समष्टिजीवानपि नित्याऽदुःखानाचक्षते। तन्निरासाय 'समस्तश' इत्युक्तम्। अत्र चागमानां प्रामाण्यम्। अत एव दुःखाऽस्पृष्टे प्रभेदाभावात् दुःखस्पृष्टापेक्षयैव 'धाप्रत्ययः पूर्वोक्तो ज्ञातव्यः॥

अत एव तद्विभागमाह - स्पृष्टेति॥

स्पृष्टदुःखा विमुक्ताश्च दुःखसंस्था इति द्विधा ।

दुःखसंस्था मुक्तियोग्या अयोग्या इति च द्विधा ॥ 04 ॥

विमुक्ताः दुःखात्। दुःखसंस्थाः = वर्तमानदुःखाः इति॥ अयोग्याः मुक्तेः। अयोग्या इत्यतः परं चशब्दो ज्ञातव्यः। अत्रापि तदेवोद्देशक्रमे निमित्तम्॥

ननु च प्राधान्याद्विमुक्तभेदः प्रथमं वक्तव्यः। सत्यम्। योग्यायोग्यभेदस्य दुःखसंस्थेष्वेव भावात् तदभिधानानन्तरं मुक्तियोग्यभेदकथनस्य सौकर्यात् क्रमोल्लङ्घनम् ॥

देवर्षिपितृपनरा इति मुक्तास्तु पञ्चधा ॥

एवं विमुक्तियोग्याश्च तमोगाः सृति संस्थिताः ॥ 05 ॥

इदानीं मुक्तानां प्रभेदमाह - देवर्षीति॥

पान्तीति पाः = चक्रवर्तिनः । नराः =मनुष्योत्तमाः। तु शब्दोऽवधारणे। तेन ये मोक्षे तारतम्यं न मन्यन्ते तन्मतं निराचष्टे। गन्धर्वादीनां केषाञ्चिदेष्वेवान्तर्भावात् केषाञ्चिदविवक्षितत्वात्, न ग्रन्थान्तरविरोधः। दुःखसंस्था मुक्तियोग्यायोग्यभेदाद् द्विविधा इत्युक्तम्। तत्र मुक्तप्रभेदं योग्येष्वतिदिशति - एवमिति ॥ एवं विमुक्तियोग्याश्च॥ देवर्ष्यादिभेदेन पञ्चधेत्यस्यानुकर्षणार्थः चकारः॥

मुक्त्ययोग्यविभागमाह - तमोगा इति॥ इति द्विधा मुक्त्ययोग्याः तमोगाः = तमोयोग्याः। न तु प्राप्ततमसः, वक्ष्यमाणविभाग विरोधात्। सृतितिसंस्थिताः = नित्यसंसारिणः। अयोग्यतातिशयानुसारेणोद्देशः॥ तमोयोग्यानां प्रभेदमाह - दैत्येति॥

इति द्विधा मुक्त्ययोग्याः दैत्यरक्षःपिशाचकाः ।

मर्त्याधमाश्चतुर्धैव तमोयोग्याः प्रकीर्तिताः ॥ 06 ॥

मर्त्याधमा इत्यतः परं इतिशब्दोऽध्याहार्यः। अप्रसिद्धत्वादस्य भेदस्याश्रद्धेयत्वं निवारयितुं एवशब्दः । प्रकीर्तिता इति - अत्रागम सम्मतिमाचष्टे । स चान्यत्रोदाहृतो द्रष्टव्यः॥

चतुर्विधा अप्येते प्रत्येकं द्विधा इत्याह - ते चेति॥

**ते च प्राप्तान्धतमसः सृतिसंस्था इति द्विधा।**

**नित्यानित्यविभागेन त्रिधैवाचेतनं मतम् ॥ 07 ॥**

ते च = चतुर्विधा अपि। सृतिसंस्थाः = संसारे वर्तमानाः॥ नाधुनाऽपि तमः प्राप्ताः। योग्यतायाश्चैतन्यस्व भावत्वेन तमोयोग्यानामयं विभागो नानुपपन्नः

एवं चेतनविभागं विस्तरेणाभिधाय अवसरप्राप्तमचेतनविभागमाह - नित्येति ॥ अत्राप्यचेतनमेव एवं विभागवदित्यर्थानभ्युपगमात् पूर्वोक्ततत्वानामपि प्रमाणान्तरेण नित्यत्वादिग्रहणं न विरुद्धम्। नित्यानित्यविभागेनेत्यस्य नित्यानित्यत्वेन तद्विभागेन चेत्यर्थः। तथा च नित्यानित्यं, नित्यं, अनित्यं चेति अचेतनं त्रिविधमित्युक्तं भवति। केचित् - सर्वं क्षणिकं मन्यमाना नित्यं न मन्यन्ते। अपरे तु - सत्कार्यवादिनः अनित्यं नाङ्गीकुर्वन्ति। सर्वेऽपि नित्यानित्यं विरोधान्नाभ्युपगच्छन्ति। तन्निरासाय एवकारः। न प्रतिज्ञामात्रेणार्थ सिद्धिरिति प्रामाणिकत्वमुक्तविभागस्य सूचयति - मतमिति॥

तच्च लेशतो दर्शयिष्यामः। यद्यपि नित्यं, नित्यानित्यं, अनित्यमित्युद्देशः कार्यः प्राधान्यात्। तथाप्युक्तिलाघवाय क्रमोल्लङ्घनम्। क्रमेण त्रयं दर्शयिष्यन् नित्यं तावद्दर्शयति - नित्या इति॥

नित्या वेदाः पुराणाद्याः कालः प्रकृतिरेव च ।

## नित्यानित्यं त्रिधा प्रोक्तमनित्यं द्विविधं मतम् ॥ 08 ॥

अत्र नित्यत्वं नाम कूटस्थतया आद्यन्तशून्यत्वम्। तच्च वेदानां 'नित्या वेदास्समस्ताश्चे'त्यादिप्रमाणसिद्धम्। अत्र वेदा इत्युपलक्षणम्। पञ्चाशद्वार्णानामव्याकृताकाशस्य च तथाभावात्। नित्यानित्यं विभागेनाह - पुराणाद्या इति ॥ पुराणाद्याः पौरुषेयग्रन्थाः एका विधा। कालोऽपरा प्रकृतिरन्या॥

ननु च त्रिधेति प्रकारत्रैविध्यमुक्तम्। न चात्र कश्चित्प्रकारो दर्शितः। किन्तु वस्तुनिर्देश एव कृतः। नैष दोषः। यन्न सर्वथा कूटस्थं नाप्यनित्यमेव तदुच्यते = नित्यानित्यम्। तस्य तिस्रो विधाः सम्भवन्ति॥ उत्पत्तिमत्वे सति विनाशाभावः, एकदेशैरुत्पत्तिविनाशौ एकदेशिनस्तदभावः, स्वरूपेणोत्पत्याद्यभावेऽप्यवस्थागमापायवत्वं चेति॥

तदेतद्विधात्रयं उक्तवस्तुत्रये अस्तीति तस्यैव ग्रहणं कृतम्॥ नन्वेवं सत्यवान्तरभेदैर्विधान्तरमुत्पेक्षितुं शक्यमित्यत एवेत्युक्तम्। तत्र उपपादकाकाङ्क्षायां 'प्रोक्तमि'त्याह - शास्त्रीयविधानमत्रैवान्तर्भावोऽन्यासामानादरणीयत्वं चेति ॥ अथवा 'पुराणानि तदर्थानि सर्वे निमेषा जज्ञिरे विकारोऽव्यक्तजन्म हि' इत्याद्यागमपरिग्रहार्थं प्रोक्तमित्युक्तम्। अत एव विरोधोऽपि परिहृतः। नन्वत्र यस्योत्पत्त्यादिकं तदनित्यमेव । यस्य तु तन्नास्ति तन्नित्यमेव । नित्यानित्यं क्वाऽस्तीति? मैवम् - स्यादेतदेवम्। यद्यंशांशिनोर्विकारविकारिणोर्वाऽत्यन्तभेदस्स्यात्। न चैवमित्यन्यत्रोपपादितमिति॥अनित्यं विभज्य दर्शयति अनित्यमिति॥ 'अनित्यं द्विविधं मतम्' ॥

## असंसृष्टं च संसृष्टमसंसृष्टं महानहम्।

बुद्धिर्मनः खानि दश मात्रा भूतानि पञ्च च ॥ 09 ॥

संसृष्टमण्डं तद्वं च समस्तं परिकीर्तितम् ।

सम्यक्सृष्टं = संसृष्टम् । अतथाभूतमसंसृष्टम्। सम्यक्ताया इयत्ताभावात् त्रैविध्याद्यपि किं न स्यादित्यतो मतमित्युक्तम्। तद्वक्ष्यामः॥

तत्रासंसृष्टं निर्दिशति - असंसृष्टमिति॥ संसृष्टं निर्दिशति - संसृष्टमिति॥

नन्वेषां चतुर्विंशतितत्वानामसंसृष्टत्वं नाम यद्येकदेशेनोत्पत्तिः, तर्ह्यनुत्पन्नास्यासत्त्वादुत्पन्नमेव तत्वम्। तच्च संसृष्टमेवेति न द्वैविध्यम। न च प्राकारान्तरमस्तीति - मैवं, सूक्ष्मरूपेण नित्यानां महदादीनां प्राकृताद्यंशैरुपचयमात्रं क्रियत इति तान्यसंसृष्टानि। न चैवं ब्रह्माण्डं तदन्तर्गतानीति संसृष्टानि। तेषामपि मूलरूपं नित्यमिति चेन्न। साक्षान्मूलरूपस्य विवक्षितत्वात्। एवंसति महदादीनां नित्यानित्यत्वं कथं न स्यादिति चेत् - स्यादेवं यदि सूक्ष्मरूपे महदादिव्यवहारः स्यात्। किन्तु प्रकृतिरेव सोच्यते। केचित् महदादिस्वरूपमेव नाभ्युपगच्छन्ति। दूरेणोक्तं विशेषम्। तेषामतिबहुतरागमविरोधं दर्शयितुं सम्प्रकीर्तितमित्युक्तम्। आगमश्चान्यत्र द्रष्टव्याः । विस्तरभिया नेहोदाह्रियन्ते। यदीदं विष्णुव्यतिरिक्तं भावाऽभावादिभेदभिन्नं जगदस्वतन्त्रं, तर्हि कस्मिन्नायत्तं, कस्मिंश्च विषये इत्याकाङ्क्षायामाह - सृष्टिरिति॥

सृष्टिः स्थितिः संहृतिश्च नियमोऽज्ञानबोधने ॥ 10 ॥

बन्धो मोक्षः सुखं दुःखमावृत्तिर्ज्योतिरेव च ।

विष्णुनाऽस्य समस्तस्य समासव्यासयोगतः ॥ 11 ॥

नियमः = व्यापारेषु प्रेरणम्। बन्धः, प्रकृतेः । मोक्षः, बन्धात् । आवृतिज्योतिषी = बाह्यतमः प्रकाशौ। एवकारो विष्णुनेत्यनेन सम्बध्यते। अस्य= समस्तस्यास्वतन्त्रस्य । भवन्तीति शेषः। नन्वेतत्पूर्वविरुद्धम्। समस्तस्य सृष्टिसंहारोक्तौ नित्यत्वोक्तिविरोधः। अचेतनस्य बोधविरोध इत्यादि। तत्रोक्तं समासेति॥ समासः=सङ्क्षेपः। व्यासः = विस्तरः । तावेव योगौ उपायौ उक्तार्थघटनायाम्। ततः इदमुक्तं भवति - उक्तधर्मेषु यत्र तत्वेऽल्पीयांसस्सम्भवन्ति तत्र तावन्तो विष्णवधीना ज्ञातव्याः । यत्र तु बहवः तत्र तावन्तः। सर्वथा स्वरूपस्वभावौ अस्य तदधीनाविति॥ तत्र स्थितिनियमौ सर्वस्य । सृष्टिसंहृती - नित्यानित्यस्य अनित्यस्य च । अज्ञानं भावरूपं दुःखस्पृष्टस्य । ज्ञानाभावस्तु सर्वस्य । बोधनं चेतनस्य। सुखं प्राप्ततमसो विना। दुःखं दुःखास्पृष्टं विना इत्यादि द्रष्टव्यम्॥ पदार्थानां सृष्ट्याद्यन्ततोऽपि प्रतीयते। अत एवेत्युक्तम्। सकल सत्तादेस्तदधीनत्वात् तत्तद्वस्तुनिमित्तमात्रमेव। स्वातन्त्र्येण विष्णुरेवास्येश्वर इति ॥

पद्मापद्मासनाऽनन्तप्रभृतीदं यदिच्छया।
सत्तादि लभते देवः प्रीयतां श्रीपतिस्स मे ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्य विरचितं तत्त्वसङ्ख्यानम्

॥ इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिततत्त्वसङ्ख्यानविवरणं
श्रीमज्जयतीर्थभिक्षुविरचितं सम्पूर्णम्

श्रीकृष्णार्पणमस्तु
मुख्यप्राणवशे सर्वं स विष्णोर्वशगः सदा
प्रीणयामो वासुदेवं देवतामण्डलाखण्डमण्डानम्